श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ द्विसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्विसप्ततितमः सर्गः ॥

## रावणस्य चिन्ता पुरीरक्षणायावधानार्थं राक्षसान् प्रत्यादेशश्च

अतिकायं हतं श्रुत्वा लक्ष्मणेन महात्मना।
उद्वेगमगमद् राजा वचनं चेदमब्रवीत्॥ **6.72.1** ॥

धूम्राक्षः परमामर्षी सर्वशस्त्रभृतां वरः।
अकम्पनः प्रहस्तश्च कुम्भकर्णस्तथैव च॥ **6.72.2** ॥

एते महाबला वीरा राक्षसा युद्धकाङ्क्षिणः।
जेतारः परसैन्यानां परैर्नित्यापराजिताः॥ **6.72.3** ॥

ससैन्यास्ते हता वीरा रामेणाक्लिष्टकर्मणा।
राक्षसाः सुमहाकाया नानाशस्त्रविशारदाः॥ **6.72.4** ॥

अन्ये च बहवः शूरा महात्मानो निपातिताः।
प्रख्यातबलवीर्येण पुत्रेणेन्द्रजिता मम॥ **6.72.5** ॥

तौ भ्रातरौ तदा बद्धौ घोरैर्दत्तवरैः शरैः।
यन्न शक्यं सुरैः सर्वैरसुरैर्वा महाबलैः॥ **6.72.6** ॥

मोक्तुं तद्बन्धनं घोरं यक्षगन्धर्वपन्नगैः।
तन्न जाने प्रभावैर्वा मायया मोहनेन वा॥ **6.72.7** ॥

शरबन्धाद् विमुक्तौ तौ भ्रातरौ रामलक्ष्मणौ।
ये योधा निर्गताः शूरा राक्षसा मम शासनात्॥ **6.72.8**॥

ते सर्वे निहता युद्धे वानरैः सुमहाबलैः।
तं न पश्याम्यहं युद्धे योऽद्य रामं सलक्ष्मणम्॥ **6.72.9**॥

नाशयेत् सबलं वीरं ससुग्रीवं विभीषणम्।
अहो सुबलवान् रामो महदस्त्रबलं च वै॥ **6.72.10**॥

यस्य विक्रममासाद्य राक्षसा निधनं गताः।
तं मन्ये राघवं वीरं नारायणमनामयम्॥ **6.72.11**॥

तद्भयाद्धि पुरी लङ्का पिहितद्वारतोरणा।
अप्रमत्तैश्च सर्वत्र गुल्मे रक्ष्या पुरी त्वियम्॥ **6.72.12**॥

अशोकवनिका चैव यत्र सीताभिरक्ष्यते।
निष्क्रमो वा प्रवेशो वा ज्ञातव्यः सर्वदैव नः॥ **6.72.13**॥

यत्र यत्र भवेद् गुल्मस्तत्र तत्र पुनः पुनः।
सर्वतश्चापि तिष्ठध्वं स्वैः स्वैः परिवृता बलैः॥ **6.72.14**॥

द्रष्टव्यं च पदं तेषां वानराणां निशाचराः।
प्रदोषे वार्धरात्रे वा प्रत्यूषे वापि सर्वशः॥ **6.72.15**॥

नावज्ञा तत्र कर्तव्या वानरेषु कदाचन।
द्विषतां बलमुद्युक्तमापतत् किं स्थितं यथा॥ **6.72.16**॥

ततस्ते राक्षसाः सर्वे श्रुत्वा लङ्काधिपस्य तत्।
वचनं सर्वमातिष्ठन् यथावत् तु महाबलाः॥ **6.72.17**॥

तान् सर्वान् हि समादिश्य रावणो राक्षसाधिपः।
मन्युशल्यं वहन् दीनः प्रविवेश स्वमालयम्॥ **6.72.18**॥

ततः स सन्दीपितकोपवह्नि -
    र्निशाचराणामधिपो महाबलः।
तदेव पुत्रव्यसनं विचिन्तयन्
    मुहुर्मुहुश्चैव तदा विनिःश्वसन्॥ **6.72.19** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्विसप्ततितमः सर्गः॥